**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्थानामलङ्काराणां समीक्षणम्

**महानन्दतिमिल्सिना**
Department of Sahitya (Sanskrit Literature), Pindeshwar Vidyapeeth (Campus), Dharan, Nepal

***Article History***: *Submitted 20 Oct. 2024; Reviewed 10 Nov. 2024; Accepted 21 Nov. 2024*
***Corresponding Author***: *Mahananda Timilsina,* ***Email***: *timsinamahananda@gmail.com*
***DOI :*** *https://doi.org/10.3126/kdk.v5i1.73643*
*Copyright 2025 © the Author(s) and the Publisher*

**लेखसारः**

*कविश्रीहर्षेण विरचितं द्वाविंशतिसर्गेषु विभाजितं नैषधीयचरितमहाकाव्यं संस्कृतसाहित्ये प्रसिद्धम्।अस्मिन् लेखे नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे कीदृशानामलङ्काराणां प्रयोगो विहितोऽस्तीति तथ्यमलङ्कार सिद्धान्तदृष्ट्या समीक्षितमस्ति । विविधरसभावैः समलङ्कृतेऽस्मिन् महाकाव्ये शब्दार्थालङ्काराणां समुचितं संयोजनं प्राप्यते।अस्मिन्लेखेशब्दालङ्कारार्थालङ्कारोपमानोपमेय-प्रस्तुताप्रस्तुतसदृशैरलङ्कारविवेचनसामग्रीभिर्विवेचनपद्धतिमग्रे सारितमस्ति । गुणात्मिकायामनुसन्धान- पद्धत्यामाधारितेऽस्मिन्ननुसन्धाने द्वितीयकस्रोतोयुतानां सामग्रीणां संयोजनं वर्तते । अत्रानुप्रासादीनां शब्दालङ्काराणामुपमोत्प्रेक्षारूपकादीनामर्थालङ्काराणाञ्च प्रयोगस्थितिः पर्यवेक्षिता वर्तते । महाकाव्येऽस्मिन् लोकोत्तरकाव्यचमत्कारो रसपरिपाकः, हृदयावर्जका भावाः, मनोहरा अलङ्कारा मनोहारि पदलालित्यम्, अद्भुतं वर्णनञ्चेत्यादयः गुणगणाः विलसन्ति । कविरसौ स्वाभाविकरूपेणालङ्कारप्रयोगे कुशलः संलक्ष्यते । अत्र प्रयुक्तैरलङ्कारैः कथावस्तु सजीवं प्रतीयते । अलङ्काराः काव्यस्य शोभाकरा धर्मा विद्यन्ते । अत्र प्रयुक्ता अलङ्कारा विषयानुकूलाः संलक्ष्यन्ते । अत्रत्या अलङ्कारा महाकाव्यस्य सौन्दर्यं प्रकाशयितुं भावपक्षं च परिपोषयितुं सफला दृश्यन्ते । अतोऽलङ्कारप्रयोगदृष्ट्या नैषधीयचरितमहाकाव्यस्य प्रथमसर्गः समुचितः प्रतिभाति । अलङ्कारमाध्यमेन पाठकजनान् समाह्लादयितुं सर्गोऽयं सफलः संलक्ष्यते*

**शब्दकुञ्जी:** शब्दालङ्कारः, अर्थालङ्कारः, उपमा, उत्प्रेक्षा, विरोधाभासः

## विषयपरिचयः

नैषधीयचरितमहाकाव्यस्य रचयिता महाकविः श्रीहर्षो वर्तते । अस्य पिता श्रीहीर माता च मामल्लदेवी इति । महाकविः श्रीहर्षो भगवत्यास्त्रिपुरदेव्याः प्रसादेन नानाशास्त्राणां पारङ्गतो विद्वान् कविश्च अभूदिति ज्ञायते । अयं कान्यकुब्जनरेशस्य विजयचन्द्रस्य जयचन्द्रस्य च राजसभाया अमूल्यं रत्नं मन्यते । अस्य जन्मस्थानं कान्यकुब्जदेश इति बहवो विद्वांसः स्वीकुर्वन्ति । अस्य महाकवेः स्थितिकालो द्वादशशतकस्योत्तरार्द्धः स्वीक्रियते । अनेन रचितानि ग्रन्थरत्नानि यथा

१. स्थैर्यविचारप्रकरणम् २. विजयप्रशस्तिः ३. खण्डनखण्डखाद्यम् ४. गौडोर्वीशकुलप्रशस्तिः ५. अर्णववर्णनम् ६. छिन्दप्रशस्तिः ७. शिवशक्तिसिद्धिः ८. नवसाहसाङ्कचरितम् ९. नैषधीयचरितं च । अस्य नैषधीयचरितं महाकाव्यं द्वाविंशतिसर्गात्मकं वर्तते । अत्र निषधदेशाधिपतेर्महाराजस्य नलस्य विदर्भराजपुकत्र्या दमयन्त्याश्च प्रणयः सुमधुरया सरसया च गिरा वर्णितोऽस्ति । अस्य महाकाव्यस्य कथास्रोतो महाभारतस्य नलोपाख्यानं विद्यते ।

राजनि नले दमयन्तीरक्ते दमयन्तीचिन्तया दूयमाने स्वारामं पर्यटति सति तेन हंसो गृह्यते दयया मुच्यते च । स एव प्रत्युपकारभावनया नलस्य स्तुतिं दमयन्तीसमीपे करोति । दमयन्त्या पूर्वराग उदयते । दमयन्त्याः पिता विदर्भः स्वयंवरमारचयति । दमयन्तीकामुका देवा अपि तत्रायान्ति, धृतनलस्वरूपाश्चत्वार इन्द्रयमवायुकुबेराः पञ्चमो नलश्चेति सर्वेषां समरूपतया दमयन्ती विचित्रां दशां प्रपद्यते । सभावर्णनाय समागता सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति । अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीता देवाः स्वानि विशिष्टचिह्नानि प्रकटीकुर्वन्ति यैर्नलः परिचितो च भवति । जाते पाणिग्रहे कलिप्रवेशो मुखमुद्रणं च तस्य भवति । नलदमयन्त्योः सुखसङ्गमेन च काव्यं समाप्यते ।

अत्र कविना मूलकथायां विभावानुभावादीनां संयोजनं रसाभिव्यञ्जकत्वं सम्पादितम् । इदं प्रौढं महाकाव्यं विदुषामपि बुद्धिवर्द्धकं वर्तते, यतो हि कविना मध्ये मध्ये विविधानि शास्त्राणि ग्रन्था अपि ग्रथिताः सन्ति । स्वयं हर्षेणैव उक्तं यत् अस्य महाकाव्यस्य अधिकारी स एव भवति येन श्रद्धया गुरुमाराध्याज्ञानग्रन्थिश्छिन्ना । नैषधीयचरिते ललितानां पदानां मञ्जुलः सन्निवेशो वर्तते । अत एव नैषधे पदलालित्यम् इति सूक्तिः प्रचलिता वर्तते । नैषधस्य कविविद्वत्समाजे महती प्रतिष्ठेति विदितमेव । इदं महाकाव्यं किरातार्जुनीयम्, शिशुपालवधञ्चापि अतिशेते । अत एव 'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः । उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इति सूक्तिर्विद्वत्समाजे प्रसिद्धा ।

## समस्याकथनम्:

नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्थानामलङ्काराणां समीक्षणम् इत्यस्मिन् लेखे निम्नाङ्किताः समस्याः समागताः सन्ति -

क. नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे कीदृशाः शब्दालङ्काराः प्रयुक्ताः सन्ति ?

ख. नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे कीदृशा अर्थालङ्काराः प्रयुक्ताः सन्ति ?

## उद्देश्यम्:

अध्ययनमेतत् निम्नाङ्कितयोरुद्देश्ययोः केन्द्रितमस्ति -

क. नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे प्रयुक्तानां शब्दालङ्काराणां समीक्षणम्,

ख. नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे प्रयुक्तानामर्थालङ्काराणां समीक्षणम्,

## अध्ययनविधिः

अध्ययनमेतत् गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति । अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । पौरस्त्यकाव्यशास्त्रिभिर्विरचितान्यलङ्कारसिद्धान्तसम्बद्धानि पुस्तकान्यप्यत्र सामग्रीरूपेण संयोजितानि विद्यन्ते । नैषधीयचरितमहाकाव्यविषये लिखितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतमस्ति । सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति ।

## सीमाः

अध्ययनेऽस्मिन् नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे विद्यमानानामलङ्काराणां समीक्षणं कृतं विद्यते । अत्र द्वाविंशतिसर्गस्थेषु सकलेष्वपि श्लोकेष्वलङ्काराः प्राप्यन्ते । अस्मिन् काव्ये काव्यशास्त्रिभिः प्रतिपादिता नैका अलङ्कारा विद्यन्ते, परमत्रास्य महाकाव्यस्य प्रथमसर्गस्थानां प्रमुखाणां शब्दार्थालङ्काराणामेवाध्ययनं कृतं विद्यते । सकलसर्गस्थानामलङ्काराणामध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा विद्यते ।

## पूर्वकार्यसमीक्षाः

समीक्षकैर्नैषधीयचरितमहाकाव्यस्य विविधविषयमवलम्व्याध्ययनमनुसन्धानं विहितं विलोक्यते । तत्र कतिपयैः समालोचकैरलङ्काराणां सामान्यरूपेणाध्ययनं कृतं संलक्ष्यते । एतानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयते-

क्षेमराज-कृष्णदास ‘नैषधीयचरितम्’ (ई.१८४९) महाकाव्यस्य भूमिकाखण्डे ‘भूमिका’ इति शीर्षके श्रीहर्षस्य तस्य नैषधीयचरितमहाकाव्यस्य च विविधपक्षसम्बद्धं विश्लेषणं विदधाति । अत्रासौ कथयति - नैषधीयचरितमहाकाव्ये द्वाविंशतिसर्गाः । धीरोदात्तगुणान्वितश्च निषधाधीशः ‘पुण्यश्लोको नलो राजा’ इति पुण्यश्लोकत्वेन प्रथममभिधेयः श्रीनलो नायकः । शृङ्गारश्चाङ्गी रसः । वीरप्रमुखाश्चाङ्गभूता रसाः । आदौ वस्तुनिर्देशः । खलस्य कलेर्निन्दा, नायकादीनां महतां गुणवर्णनं चापि स्पष्टे । प्रायश्च सर्वे सर्गा अवसाने विभिन्नवृत्तैः पद्यैः प्रथममेकवृत्तमयैर्विहिताः । केवलः पुनर्द्वादशः सर्गो विभिन्नवृत्तमयाः । हंसगमनभैमीदर्शनादिरूपो भाविसर्गप्रतिपादनाद्यर्थो द्योतितः । सायंसन्ध्यावर्णनं यथाऽन्त्ययोः सर्गयोः । प्रातः सन्ध्यावर्णनं च यथैकोनविंशे सर्गे । सूर्यादीनां वर्णनं चापि तत्र तत्र स्पष्टमेव । ऋतोर्वर्णनं युद्धादिवर्णनं प्रायोऽत्र दिङ्मात्रम्, प्रकृतस्यास्य शृङ्गारप्रधानत्वात् । नाम चास्य नायकेतिवृत्तमूलम् । श्रीहर्षश्चायं खण्डनखण्डखाद्यं स्थैर्यविचारं विजयप्रशस्तिं गौडोर्वीशकुलप्रशस्तिं छन्दप्रशस्तिं शिवभक्तिसिद्धिं साहसाङ्कचरितं चापि निर्मितवान् । तत्र वितण्डाग्रन्थेषु खण्डनखण्डखाद्यं महाकाव्येषु च प्रकृतं नैषधीयचरितं परां प्रतिष्ठामवलम्बते । यद्यपि महाकाव्यस्यास्य जीवातुप्रमुखा बहुला व्याख्यास्तथापि नारायणसूरिकृतैव नैषधीयचरितस्य भावप्रकाशेत्यभिख्यां सार्थयते । अत्र परमेको दोषः यदलङ्कारविवेचनवैधुर्यम् । यत्र क्वचिदलङ्कारनिर्देशोऽपि तत्र प्रायः स्खलनं व्याख्यातुः । तथा हि, व्यङ्ग्योपमेति यत्र लेखितुमर्हं तत्र लुप्तोत्प्रेक्षेति । नायं प्रमादः शोधकानां बहुत्र तथा लिखिततत्वादित्यादिना श्रीहर्षस्य तत्काव्यस्य च वैशिष्ट्यं प्रकाशयति (क्षेमराज, ई.१८४९ पृ.३-५) ।

आचार्य शेषराजशर्मा रेग्मी नैषधीयचरितम् (ई.१९८१) इति महाकाव्यस्य भूमिकायां ‘महाकाव्य नैषधीयचरित और महाकवि श्रीहर्ष’ इति शीर्षके महाकाव्यस्य विषये विवेचयति । अत्र कविनातिशयोक्त्यलङ्कारमाध्यमेन नलस्य गुणानामशक्यवर्णनं विहितमस्ति -

**यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् ।**
**पारेपरार्धं गणितं यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात् ॥** (३ : ४०)

चन्द्रमसि विद्यमानस्य कलङ्कस्यानेनोत्प्रेक्षापह्नुतिमाध्यमेन सजीवं वर्णनं कृतम् -

**स्मरमुखं हरनेत्रहुताऽशनाज्ज्वलदिदं विधिना चकृषे विधुः ।**
**बहुविधेन वियोगिवधैनसा शशमिषादथ कालिकयाऽङ्कितः ॥** (४ : ७३)

एवञ्च सारालङ्कारमाध्यमेनानेन इन्द्रस्य श्रेष्ठताया मनोहरं वर्णनं कृतम् -

**लोकस्रजि द्योर्दिवि चादितेया अत्यादितेयेषु महान्महेन्द्रः ।**
**किङ्कर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्षा किमतः पराऽपि ॥** (६ : ८१)

डा.कपिलदेव द्विवेदी ‘संस्कृतनिबन्धनवनीतम्’ (ई.१९९२) इति पुस्तकस्य ‘श्रीहर्षः’ इति शीर्षकमाध्यमेन

महाकवेः श्रीहर्षस्य तस्य नैषधीयचरितमहाकाव्यस्य च वैशिष्ट्यं प्रकटयति। नैषधे पदे पदे पदलालित्यानुगता कल्पना चमत्कृतिः समनुरञ्जयति साहित्यिकचेतांसि । कविताकामिन्याः कमनीये कलेवरेऽलङ्कृतिविन्यासेऽपि न कोऽपि कविस्तुलनामधिरोहति श्रीहर्षस्य । अर्थालङ्कारैः सह शब्दालङ्काराः दासा इवानुप्रासा बलाद् आवर्जयन्ति साहित्यप्रणयिमनांसि। अत एव च 'नैषधे पदलालित्यम्' इति प्रसिद्धिः। कविरस्य कल्पनाकोषः सर्वथा सर्वदा च परिपूर्णो लक्ष्यते । यतः पदे पदे कल्पनारत्नैर्मनांसि रञ्जयन् विविधविधां चमत्कृतिं प्रदर्शयन् कविरेष न मनागपि परिश्रान्तिमनुभवति । सर्वेषु शास्त्रसिद्धान्तेषु विशेषतो दार्शनिकक्षेत्रे कवेरस्य प्रौढं पाण्डित्यं पदे पदे प्रकर्षतीव प्राज्ञचेतांसि, इत्यादिना द्विवेदीमहाभागः श्रीहर्षस्य कवित्वप्रतिभाविषयं प्रतिपादितवान् (द्विवेदी, ई.१९९२, पृ.१५९)।

डा.राजवंश सहाय 'हीरा' 'संस्कृत साहित्य-कोश' (ई.२००२) इति कोशस्य 'श्रीहर्ष' इति शीर्षकेऽस्य महाकाव्यस्य वैशिष्ट्यं प्रतिपादयति, यत् - महाकविः श्रीहर्षः कालिदासोत्तरकालिकेषु कलावादिषु कविषु सर्वोच्चस्थानं लभते । अस्य नैषधीयचरितमहाकाव्ये दूरारूढकल्पना, पाण्डित्यप्रदर्शनम्, आलङ्कारिकसौन्दर्यम्, रसपेशलता, अप्रस्तुतविधानस्यापूर्वभाण्डागारसदृशानि वैशिष्ट्यानि प्राप्यन्ते । अस्य काव्यप्रणयनस्योद्देश्यं सुकुमारमतीनां पाठकानां कृते न। पण्डितानां मनोविनोदायाऽनेन काव्यरचना विहिता। अस्य दार्शनिकं ज्ञानं नितान्तं प्रौढम्। अनेन नैषधीयचरितमहाकाव्यस्य सप्तदशे सर्गे चार्वाकमतस्य स्वस्य प्रौढपाण्डित्यप्रदर्शनविधिना खण्डनं विहितम्। कविना महाकाव्ये उत्प्रेक्षा, अतिशयोक्तिः, अपह्नुतिप्रभृतीनामलङ्काराणां प्रयोगः कृतः । अनेन पदलालित्यगुणमाध्यमेन संस्कृतविदुषां मनः समाकृष्टम्। नैषधं सुन्दरपदानामपूर्वभाण्डागारमेव । अलङ्कृतशैलीप्रयोगदृष्ट्या नैषधीयचरितं महनीयं ग्रन्थरत्नमस्तीत्यादिनास्मिन् कोशे नैषधीयचरितमहाकाव्यस्य महत्त्वं प्रतिपादितं वर्तते (राजवंश, ई.२००२, पृ.५९५-५९८)। आचार्यरामचन्द्र मिश्रः 'संस्कृतसाहित्येतिहासः' (ई.२०१०) इति पुस्तकस्य 'श्रीहर्षः' इति शीर्षके श्रीहर्षस्य विषये तस्य नैषधीयचरितमहाकाव्यस्य विषये च विस्तरेणैव प्रतिपादयति। अस्य ग्रन्थस्य सरसवर्णनपद्धतिः शृङ्गारप्रकर्षपूर्णकथा च सहृदयहृदयान्यावर्जयतः । यथैव श्रीहर्षस्य खण्डनखण्डखाद्यमद्वितीयं तथैव नैषधीयमपि स्वक्षेत्रेऽनुपमम्। या प्रतिभा दर्शनरहस्यानि सरलीकरोति सैव शृङ्गारधारामपि प्रवाहयति। (मिश्रः, ई.२०१०, पृ.५९)।

डा.कपिलदेव द्विवेदी प्रौढरचनानुवादकौमुदी (ई.२०१५) इति पुस्तके 'नैषधं विद्वदौषधम्' इति शीर्षके कथयति यत् -

> श्रीहर्षो महाकविर्महादार्शनिको महावैयाकरणश्चेत्यादिविविधविरुद्धगुणगणसमन्वयादतिशेते सर्वानन्यान् महाकवीन् पाण्डित्यप्रदर्शने वाग्वैभवे रुचिररचनायां भावाभिव्यक्तौ साधुशब्दसङ्कलने विद्यावैशारद्ये वक्रोक्तिव्यवहारे च । अनुपमवैदुष्यवैभवाविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते प्रबन्धोऽस्य । नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इति साह्लादमुद्घोष्यते यशोऽस्य सुधीभिः । विविधविद्यापारदृश्वा श्रीहर्षः । विविधदर्शनसिद्धान्तानां व्याकरणदिशास्त्रराद्धान्तानां चोल्लेखात् सञ्जायते नैषधचरिते महत् काठिन्यम् इत्यादिनासौ श्रीहर्षस्य काव्यवैशिष्ट्यं प्रतिपादयति (द्विवेदी, ई.२०१५, पृ.३३०)।

डा. रमेशचन्द्रशुक्लः 'प्रबन्धरत्नाकरः' (वि.सं.२०२३) इति पुस्तकस्य 'नैषधं विद्वदौषधम्' इत्युपशीर्षके नैषधीयचरितमहाकाव्यस्य विषये तत्र प्रयुक्तानामलङ्काराणां विषये च विवेचनं विदधाति। वस्तुतः संस्कृतकाव्येषु नैषधीयचरितमतीवोत्कृष्टपदमलङ्करोति इह दिङ्मात्रेण तत्रत्यानां सुमृदुललितानां पदानां रमणीयता अलङ्काराणां चमत्कारस्य चारुता, अनन्यनीकाशा अनुप्रासविलासाश्च चित्रिताः। काव्येऽस्मिन् उत्प्रेक्षाणामथ चोपमानां विभापि सर्वथैव अनुपमा दृष्टा भवति। नात्र संशयो यदेतत्काव्यं सचेतसां धियं चित्तञ्चोभयमपि पूर्णतया परितोषयति। एतेषां भूयिष्ठानां परमश्लाघनीयानां गुणानामग्रे कस्य नाम हि जनस्य दृष्टिं द्वित्रास्तुच्छतमा दुर्बलतमाश्च पुनरुक्ततादिदोषाः

कथमपि नावर्जयितुं शक्नुवन्ति, इत्यादिना नैषधीयचरितं विवेचयति (शुक्लः, ई.२०२३, पृ.४२७)।

श्रीहर्षस्य जीवनवृत्तविषयं नैषधीयचरितमहाकाव्यविषयञ्चाङ्गीकृत्य विविधैः समीक्षकैर्विविधेषु विषयेषु विस्तरेण समीक्षणं कृतं दृश्यते । मूलतः समीक्षकाः श्रीहर्षस्य जन्मस्थाननिर्धारणविषये जन्मसमयानुसन्धानविषये च केन्द्रिता विद्यन्ते । कतिपये समीक्षका महाकाव्यस्यास्य रसभावादिविवेचने केन्द्रिताः प्राप्यन्ते । अस्य महाकाव्यस्य प्रथमसर्गे विद्यमानानामलङ्काराणां विशदं विवेचनं कुत्रापि नैवावलोकितम् । अतो लेखोऽयं नूतनानुसन्धानप्रतिपादने समर्थो भवतीति ।

**अलङ्कारसिद्धान्तः**

अलमुपपदपूर्वकात् कृधातोर्घञ्प्रत्यये सत्यलङ्कारशब्दो निष्पद्यते । **अलं क्रियते अनेनेत्यलङ्कार** इति करणप्रधानव्युत्पत्त्याऽलङ्कारशब्दः शरीरसुषमावर्द्धकानां हारादीनामिव काव्यशोभासम्पादकाना- मनुप्रासोपमालङ्काराणां वाचकः । **अलङ्कृतिरलङ्करणं वाऽलङ्कारः** इति भावप्रधानोऽलङ्कारशब्दः सर्वेषां साहित्यसौन्दर्याधायकतत्त्वानां वाचकः । **काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते** (दण्डी, काव्यादर्शः, २/१) इत्यलङ्कारस्य प्रथमलक्षणानुसारेण काव्यशोभाकारिणोगुणरसरीत्यादयःसर्वेधर्माअलङ्कारपदवाच्याः।वामनपूर्ववर्तिनोभामहोद्भटादयोगुणालङ्कारयोरभेदमङ्गीकुर्वन्ति, परं वामनः **काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः** (वामनः, ई. १९१०, पृ.१) इति स्वसिद्धान्तं प्रकटयति । असौ **सौन्दर्यमलङ्कारः** इत्यलङ्कारलक्षणं प्रतिपाद्य दोषहानाद् गुणालङ्कारादानाच्चालङ्कारः सम्भवतीति कथयति। ध्वन्यालोककार आनन्दवर्धनः काव्यस्य प्रधानभूते रसे तदङ्गभूतयोः शब्दार्थयोरङ्गरूपेणाऽऽश्रिता अलङ्काराः कटकादिवद् भवन्तीति प्रतिपादयति (आनन्दवर्धनः, पृ.३४१)। असौ काव्ये रसादीनां व्यञ्जकत्वेनालङ्काराणां संयोजनं कर्तव्यमित्यलङ्कारप्रयोगस्थितिं प्रकटयति । काव्येऽलङ्कारा अङ्गित्वेन न प्रयोक्तव्या अपि तु रसस्याङ्गरूपेणैव निवेशनीया इत्यसौ प्रतिपादयति। मम्मटप्रतिपादितस्यालङ्कारस्य लक्षणानुसारेणाङ्गिनं रसमनुप्रासोपमादयोऽलङ्काराः शब्दार्थमाध्यमेनोपकुर्वन्ति, परं सर्वदैव न कदाचिदेव (मम्मटः, पृ.३८५) । आचार्यो जयदेवस्तु अनुष्णस्य अग्नेरिव शब्दार्थालङ्काररहितस्य काव्यस्याप्यसम्भवतां स्वीकरोति (जयदेवः, ई.१९९९, पृ.१०) । अलङ्कारसम्प्रदायप्रवर्तकस्य भामहस्यालङ्कारविषयकं मतमाधारीकृत्य दण्ड्युद्भट-रुद्रट-जयदेवसदृशा आचार्या काव्येऽलङ्कारतत्त्वमेव प्राधान्येन स्वीकुर्वन्ति। भामहानुसारमलङ्काररहितं काव्यमाभूषणरहिता वनिता इव न शोभते। अनेन रसस्य प्राधान्यमस्वीकृत्य रसो रसवदलङ्कारेऽन्तर्भावितः । अस्य पूर्ववर्तिना भरतमुनिना उपमारूपकदीपकयमकालङ्काराः परिगणिताः । मम्मटादयो ध्वनिवादिनः काव्यशास्त्रिणोऽप्यलङ्कारं स्वग्रन्थेषु विशेषेण विश्लेषयन्ति । तत्रालङ्कारसङ्ख्याविषये सर्वेषां वैमत्यं दृश्यते । भामहः ३८, दण्डी ३७, उद्भटः ४१, रुद्रटः ६८, जयदेवः १००, रुय्यकः ८२, मम्मटः ६८, विश्वनाथः ८६, जगन्नाथश्च ७० सङ्ख्यकानलङ्कारान् विश्लेषयन्ति । काव्यशास्त्रिभिः प्रस्तुतम् अलङ्कारसङ्ख्याविषयं निम्नाङ्कितेन स्तम्भचित्रेणापि प्रस्तोतुं शक्यते -

**अलङ्कारसङ्ख्यानां स्थितिः**




रुद्रटो वास्तवौपम्यातिशयश्लेषमूलकत्वेनालङ्कारान् चतुर्धा विभजति । रुय्यकस्तु साधर्म्य-विरोध-शृङ्खला-तर्कन्याय-वाक्यन्याय-लोकन्याय-गूढार्थप्रतीतिमूलकत्वेनालङ्कारान् वर्गीकरोति । भामह-दण्ड्युद्भट- रुद्रट- भोज-कविशेखर- मम्मट- जयदेव- विश्वनाथाप्पयदीक्षितादयः काव्यशास्त्रिणोऽलङ्कारसम्प्रदायस्य परिपोषका दृश्यन्ते। भामह-दण्डि-रुद्रट-जयदेवप्रभृतय आचार्या अलङ्कारमेव साहित्यस्यात्मस्वरूपं मन्यन्ते, अपरेऽलङ्कारमहत्त्वाभिज्ञा ध्वनिवादिनो मम्मटजगन्नाथादयोऽपि स्वस्वग्रन्थेषु अलङ्कारान् विस्तरेण व्याकुर्वन्ति । अलङ्कारवादिनस्त्वलङ्कारं साहित्यशोभाजनकं स्थायिधर्ममेव स्वीकुर्वन्ति। काव्यस्यात्मतत्त्वविषये विवादे सत्यपि काव्येष्वलङ्कारप्रयोगस्य महनीयता दृश्यत एव । मूलतोऽलङ्कारः शब्दार्थमाध्यमेन काव्यसौन्दर्यमुत्पादयति । मम्मटप्रभृतयोऽलङ्कारान् शब्दार्थयोर्भेदद्वयेन विभजन्ति । केचित्तु तृतीयं शब्दार्थोभयभेदरूपञ्च मन्यन्ते । तत्रापि मुख्यरूपेण भोज एव नव्यं भेदं प्रदर्शयति (भोजदेवः, ई.१९६७, पृ.२०२) । तस्मात् पूर्वं शब्दार्थयोर्भेदे विवादो न । मम्मटादिभिरन्वयव्यतिरेकाभ्यां शब्दपरिवृत्तिसहत्वासहत्वाभ्यां वा शब्दार्थोभयरूपिणी भेदव्यवस्था विहिता ।

**नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्थानामलङ्कारणां पर्यवेक्षणम्**

शब्दार्थालङ्काररूपं भेदद्वयमाधारीकृत्यात्र महाकवेः श्रीहर्षस्य नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्थानां शब्दार्थालङ्काराणां विश्लेषणं विधीयते । कविनाऽत्रैकस्मिन्नपि श्लोके विविधानामलङ्काराणां प्रयोगो विहितः । नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे १४५ सङ्ख्यकेषु श्लोकेष्वेवालङ्कारस्यावस्थितिर्दृश्यते, एकस्यैवालङ्कारस्य विविधेषु श्लोकेष्वपि प्रयोगः संलक्ष्यते । परमस्मिन् लेखे प्रमुखरूपेण दृष्टिपथं समागतानामलङ्काराणामेकैकश्लोकमाध्यमेनैव विवेचनं विधीयते ।

**नैषधीयचरितस्य प्रथमे सर्गे शब्दालङ्कारप्रयोगः**

नैषधीयचरितमहाकाव्यस्य श्लोके श्लोके शब्दालङ्कारस्य छटा विराजते । अत्रानुप्रासालङ्कारस्याधिकः प्रयोगोऽवाप्यते । अस्य महाकाव्यस्य प्रथमसर्गे संलक्षितानां शब्दालङ्काराणां स्थितिरत्र प्रदर्श्यते ।

**पुनरुक्तवदाभासः**

शब्दश्रवणमात्रादेवार्थस्य पौनरुक्त्येन प्रतीतिरेव पुनरुक्तवदाभासः । अत्र भिन्नाकारकाः शब्दा दृश्यन्ते । (विश्वनाथः, १०/२) । नैषधीयचरिते यथा -

**अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः ।**
**तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥** (१/४४)

अत्र 'स्वात्मशरासनाश्रयः' इत्यत्र प्रयुक्तयोः स्व-आत्मपदयोः पुनरुक्तिर्दृश्यते, परं सु+आत्म इति सन्धिविच्छेदेऽर्थभेदो जायते ।

**अनुप्रासः**

स्वरवैसादृश्येऽपि व्यञ्जनवर्णानां साम्येऽनुप्रासः । अस्यापि द्वौ भेदौ दृश्येते । अनेकस्य व्यञ्जनस्य सकृत् सादृश्यं छेकानुप्रासः तथैवैकस्यानेकस्य वा व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः (मम्मटः, ९/७९) । नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गेऽनुप्रासालङ्कारस्य प्रयोगो बाहुल्येन दृश्यते । अस्य महाकाव्यस्य श्लोके श्लोकेऽनुप्रासालङ्कारो विलसति । अनुप्राससंयोजने कविरसौ सिद्धहस्तः संलक्ष्यते । यथा-

**नृपेऽनुरूपे निजरूपसंपदां दिदेश तस्मिन्बहुशः श्रुतिं गते ।**
**विशिष्य सा भीमनरेन्द्रनन्दना मनोभवाज्ञैकवशंवदं मनः ॥** (१/३३)

अत्र 'न-प-र' इत्यनेकव्यञ्जनवर्णानामसकृदावृत्त्या वृत्त्यनुप्रासः । एवञ्चास्मिन् श्लोके 'नरेन्द्रनन्दना' इत्यत्र 'न-द' वर्णयोरेकबारमावृत्त्या छेकानुप्रासः । दमयन्ती नलं प्रति चित्तं निदधाविति भावं पोषयितुमत्रत्योऽनुप्रासः समर्थो दृश्यते ।

**लाटानुप्रासः**

एक एव शब्दो यत्र तात्पर्यभेदेन समागच्छति तत्र लाटानुप्रासः । शब्दार्थयोरभेदेऽपि तात्पर्यमात्रभेदात् लाटानुप्रसासः (मम्मटः, ९/८१) । नैषधीयचरिते यथा -

**न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः ।**
**विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि** ॥(१/१३१)

अत्र 'मम वधः' इत्यत्र वधशब्दः सामान्यार्थवाचकः, 'प्राणिवधः' इत्यत्र विशेषार्थवाचकः । अतो वधशब्दस्य तात्पर्यभेदेन प्रयोगात् लाटानुप्रासः ।

**यमकम्**

अर्थे सत्यर्थभिन्नानां वर्णानां तेनैव क्रमेणावृत्तिर्यमकालङ्कारः (विश्वनाथः, १०/८) । नैषधीयचरिते यथा -

**अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः ।**
**प्रदक्षिणीकृत्य जयाय सृष्ट्या रराज नीराजनया स राजघः ॥** (१/१०)

अत्र 'रराज-नीराज-राजघः' इत्यत्र राज इति क्वतित् सार्थकस्य क्वचिद् निरर्थकस्य च पदस्य त्रिरावृत्त्या यमकालङ्कारः।

**वक्रोक्तिः**

अन्यस्यान्यार्थकं वाक्यं यद्यन्यथा योज्यते, तत्र श्लेषेण काक्वा च द्विविधा वक्रोक्तिः ।
(विश्वनाथः, १०/९) । नैषधीयचरिते यथा -

**पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।**
**कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥** (१/४)

नलकथा मे वाचं कथं न पवित्रयिष्यति, अपि तु पवित्रां करिष्यत्येवेति भिन्नकण्ठध्वनिप्रयोगात् काकुवक्रोक्तिः ।

**श्लेषः**

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेषः।वर्ण-प्रत्यय-लिङ्ग-प्रकृति-पद-विभक्ति-वचन-भाषाणां भेदाद् श्लेषोऽष्टधा।(विश्वनाथः, १०/२) नैषधीयचरिते यथा -

**अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च ।**
**दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥** (१/१७)

अत्र कविना = काव्यकर्त्रा शुक्रेण च, बुधेन = पण्डितेन चन्द्रपुत्रग्रहेण चेति कविबुधशब्दाभ्यामर्थद्वय-प्रतिपादनात् श्लेषालङ्कारः ।

**नैषधीयचरितस्य प्रथमेऽसर्गेऽर्थालङ्कारप्रयोगः**

नैषधीयचरितमहाकाव्ये विविधानामर्थालङ्काराणां प्रयोगोऽवाप्यते । अत्र स्वाभाविकरूपेण च समापतिता नैकेऽलङ्काराः सन्ति । महाकाव्यस्य श्लोके श्लोकेऽलङ्कारा दृश्यन्ते, एकस्मिन्नेव श्लोकेऽपि नैकविधानामलङ्काराणां स्थितिर्विद्यते । तत्र महाकाव्यस्य प्रथमसर्गे संलक्षितानामर्थालङ्काराणां विवरणमधः प्रस्तूयते ।

**उपमा**

भिन्नयोरपि उपमानोपमेययोः साधर्म्ये उपमालङ्कारो भवति । एषोपमा पूर्णालुप्ताभेदेन द्विविधा (मम्मटः, १०/८७) । तत्र पूर्णोपमायामुपमानोपमेयसाधारणधर्मवाचकपदानामुपस्थितिर्दृश्यते । न्यूनगुणयुतं वस्तूपमेयपदवाच्यो भवति चेदधिकगुणयुतं वस्तूपमानं कथ्यते । वस्तु लुप्तोपमायां तु तेष्वेकस्य द्वयोर्वा लोपो जायते । नैषधीयचरिते यथा -

**निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।**
**तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ॥** (१/६५)

अत्र प्रकाशरूपा मयूखा वेगयुक्तसप्तश्वगामिनं सूर्यमिव, हयारोहा वेगबद्धहयगामिनं राजानं नलमनुगतवन्त इत्युपमालङ्कारः । यथा वा -

**अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।**
**अबोधि तज्जागरदुःखसाक्षिणी निशा च शøया च शशाङ्ककोमला ॥** (१/४९)

अत्र 'शशाङ्क इव कोमला शय्या' इत्यत्र सकलानामपि उपमानोपमेयवाचक- साधारणधर्माणामुपात्तत्वात् पूर्णोपमालङ्कारः ।

**रूपकम्**

उपमानोपमेययोरभेदारोपे रूपकालङ्कारो भवति (मम्मटः, १० /९३) । रूपकालङ्कारे उपमानोपमेययो-रतिसाम्याद् भेदप्रतीतिरपह्नुता भवति ।

**स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।**
**कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादशृणोद् गुणोत्करम् ॥** (१/४२)

अत्र स्वकान्तिकीर्तिव्रज एव मौक्तिकस्रक् इत्यत्रोपमानोपमेययोरभेदारोपात् रूपकालङ्कारः ।

**ससन्देहः**

उपमेये उपमानस्य प्रतिभोत्थित संशय एव ससन्देहालङ्कारः । (विश्वनाथः, १०/३५)

नैषधीयचरिते यथा -

**सनालमात्मानमनिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् ?**
**अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भः प्रभुचामरं नु किम् ?** (१/१२२)

लज्जया नतो हंसः सनालकाञ्चनं किम् ? अथवा प्रवालदण्डभूषितं वरुणदेवस्य चामरं किम् ? इत्यादिना राज्ञा नलेन हंसमवलोक्य सन्देहो विहितः । अत्राऽनिश्चयः सन्देहोऽलङ्कारः ।

**भ्रान्तिमान्**

अतिसाम्यात् अन्यस्मिन् वस्तून्यपि तद्बुद्धिर्भ्रान्तिमानलङ्कारः (विश्वनाथः, १०/३६) । नैषधीयचरिते यथा -

**युवद्वयीचित्तनिमज्जनोचित-प्रसूनशून्येतरगर्भगह्वरम् ।**
**स्मरेषुधीकृत्य धिया भयान्धसा स पाटलायाः स्तबकं प्रकम्पितः ॥** (१/९५)

अत्र राजनि नले मूढबुद्ध्या पाटलवृक्षस्य स्तवके कामदेवस्य तूणीरस्य भ्रमः सञ्जायते, अतोऽत्र भ्रान्तिमान् अलङ्कारः ।

**अपह्नुतिः**

प्रस्तुतस्योपमेयं प्रतिषिध्योपमानस्य स्थापनमपह्नुतिरलङ्कारो भवति । (विश्वनाथः, १०/३८) ।

नैषधीयचरिते यथा -

**तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।**
**तनोति भानोः परिवेषकैतवात् तदा विधिः कुण्डलनां विधोरपि ॥** (१/१४)

अत्र परिवेषस्य निषेधं विधाय कुण्डलनायाः स्थापनात् अपह्नुतिरलङ्कारः ।

**उत्प्रेक्षा**

प्रकृतस्यार्थस्य असम्भविनोपमानेन सह यत्सम्भावनं क्रियते सैवोत्प्रेक्षालङ्कारः (मम्मटः,१०/९२)।नैषधीयचरिते यथा -

**यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम ।**
**तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥** (१/९)

नलस्य यात्रासु सैन्येनोद्धतं रज सुधाम्बुधौ पतितं पङ्कीभवत् विधौ कलङ्कत्वमधुनापि दधाति, इत्यत्र उत्प्रेक्षावाचकानां इवादिशब्दानामभावे प्रतीयमानोत्प्रेक्षा । यथा वा -

**अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।**
**उरः श्रिया तत्र च गोपुरस्फुरत् कपाटदुर्धर्षतिरः प्रसारिता ॥** (१/२२)

नलस्य वक्षस्थलकान्त्या पुरद्वारस्थितानि कपाटानि अपहृतानि ध्रुवम् इत्यत्र उत्प्रेक्षालङ्कारः ।

**अतिशयोक्तिः**

आरोपस्य निश्चयरूपत्वे सति अतिशयोक्त्यलङ्कारः । अस्यालङ्कारस्य भेदेऽभेदः, सम्बन्धेऽसम्बन्धः, तद्विपर्ययः, कार्यहेत्वोः पौर्वापर्यात्ययः इति भेदेन पञ्चधा । (विश्वनाथः, १०/४६) । नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गेऽस्योदाहरणम् -

**अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे ।**
**तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ॥** (१/२०)

अत्र 'नलस्य चरणेन कमलेषु घृणा अकारि' इत्यादिषु वाक्येषु चरणादीनां कमलादिषु घृणायाः सम्बन्धाभावेऽपि सम्बन्धस्योक्तेः प्रतिपादनादतिशयोक्त्यलङ्कारः ।

**तुल्ययोगिता**

प्रस्तुतानामप्रस्तुतानां वा पदार्थानामेकधर्माभिसम्बन्ध एव तुल्ययोगिता । (विश्वनाथः, १०/४७) । नैषधीयचरिते यथा -

**अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजाश्रयः ।**
**तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥** (१/४४)

अत्र 'अकारि' इत्येकया क्रियया सह नल-स्मरयोर्द्वयोः प्रस्तुतयोः कर्तृपदयोः सम्बन्धप्रदर्शनात् तुल्ययोगितालङ्कारः ।

**निदर्शना**

अत्र प्रतीतिविषयमलभमानयोर्वाक्ययोः पदार्थयोर्वा सम्बन्ध उपमापरिकल्पकस्तत्र निदर्शनालङ्कारः (मम्मटः, १०/९७) । नैषधीयचरिते यथा -

**विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।**
**अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितम् ॥** (१/१६)

अत्र नलः द्विफालबद्धान् केशान् न विभर्ति, किन्तु शिरस्थितम् अयशोयुगमेतत् इत्यपह्नुतिरलङ्कारः ।

**व्यतिरेकः**

यत्रोपमानापेक्षया उपमेयस्य व्यतिरेक आधिक्यं वा प्रदर्श्यते तत्र व्यतिरेकालङ्कारो भवति (मम्मटः, १०/१५९) । नैषधीयचरिते यथा -

**निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि ।**
**नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥ (१/१)**

श्लोकेऽस्मिन् सुधाया इति उपमानादपि नलकथारूपस्योपमेयस्य मधुरताया आधिक्यवर्णनाद् व्यतिरेकालङ्कारः ।

**समासोक्तिः**

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् यत् अप्रकृतार्थस्याभिधानं सा समासेन सङ्क्षेपार्थद्वयकथनात् समासोक्तिरलङ्कारः (मम्मटः, १०/१४८) । नैषधीयचरिते यथा -

**नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः ।**
**दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥** (१/८५)

वायुना चुम्बिता विकासरम्यमुकुला इषत्कम्पिनी लता नृपेण अवलोकितेत्यत्र विशेषण-लिङ्ग-कार्यसाम्यात् प्रस्तुतलतायामप्रस्तुतस्य नायिकाव्यवहारस्य साम्यात् समासोक्तिरलङ्कारः ।

**परिकरः**

साभिप्रायैर्विशेषणैर्विशेष्यस्य कथनं परिकरालङ्कारः (मम्मटः, १०/११७) । नैषधीयचरिते यथा -

**मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।**

**गतिस्तयोरेष जनस्तमर्दयन्नहो विधे ! त्वां करुणा रुणद्धि न ॥ (१/१३५)**

अत्र जननी इति विशेष्यपदस्य कृते मदेकपुत्रा, जरातुरा, नवप्रसूतिः, वरटा, तपस्विनी चेत्यादीनि विशेषणपदानि साभिप्रायाणि सन्ति । अतोऽत्र परिकरालङ्कारः । महाकाव्ये कारुण्यं परिपोषयितुमत्रत्यः परिकरालङ्कारः समर्थः प्रतिभाति ।

**परिकराङ्कुरः**

साभिप्राये विशेष्ये सति परिकराङ्कुरालङ्कारः (दीक्षितः, श्लोकः-६३) । नैषधीयचरिते यथा -

**अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।**

**इति स्म चक्षुः श्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥** (१/२८)

अस्माकं नयनयुगलं नलगुणान् श्रृणोति, वयं धन्या इति पातालनिवासिन्यो नागप्रियाः कथयन्ति, अत्र नागस्य पर्यायत्वेन प्रस्तुतं चक्षुश्रवा इति विशेष्यपदं साभिप्रायमस्ति, अतोऽत्र परिकराङ्कुरालङ्कारः ।

**पर्यायोक्तम्**

यदा प्रकारान्तरेण प्रतीयमानं वस्तु अभिधयैव बोध्यते तदा पर्यायोक्तम् (विश्वनाथः, १०/६०) । नैषधीयचरिते यथा -

**निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।**

**न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ॥** (१/११)

अत्र शत्रुराज्ञां सुन्दरीणामश्रुपातादिवर्णनेन नलः प्रतिपक्षभूपान् विजितवान् इति प्रतीयमानं वस्तु अभिधेयेनैव ज्ञायते, अतोऽत्र पर्यायोक्तालङ्कारः ।

**अर्थान्तरन्यासः**

यत्र साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण समर्थ्यते, विशेषो वा सामान्येन समर्थ्यते सोऽर्थान्तरन्यासालङ्कारः । (मम्मटः, १०/१०९) । नैषधीयचरिते यथा -

**स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत ।**

**त्यजन्त्यसूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥** (१/५०)

अत्र नलः स्मरोपतप्तोऽपि विदर्भराजतनयां न अयाचत इति विशेषवाक्यम्, मानिनः असून् शर्म च त्यजन्ति परमेकम् अयाचितव्रतं न त्यजन्तीति सामान्यकथनेन समर्थनादर्थान्तरन्यासालङ्कारः ।

**काव्यलिङ्गम्**

हेतोर्वाक्यार्थत्वे पदार्थत्वे च काव्यलिङ्गम् (विश्वनाथः, १०/६२) । नैषधीयचरिते यथा -

**सरोरुहं तस्य दृशैव निर्जितं जिताः स्मितेनैव विधोरपि श्रियः ।**

**कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ॥** (१/२४)

अत्र सरोरुहस्य विधोश्च विजयरूपे वाक्यार्थे मुखस्योपमाया दरिद्रताया हेतोः प्रतिपादनात् वाक्यार्थहेतुकं काव्यलिङ्गम्।

**विशेषोक्तिः**

प्रसिद्धे कारणे विद्यमाने कार्यस्यानुत्पत्तिर्विशेषोक्तिः । एषा उक्तनिमित्ता, अनुक्तनिमित्तेति द्विविधा (विश्वनाथः, १०/६७) । नैषधीयचरिते यथा -

**इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च ।**
**अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम् ॥** (१/१०४)

अत्र पद्ये आनन्दस्य हेतौ सुरभिवनादीनामुपस्थितावपि तस्य फलरूपस्यानन्दस्याभावो विद्यते, अत्र फलाभावहेतुरूपेण 'विदर्भसुभ्रूविरहेण' इति पदं प्रस्तुतम्, अतोऽस्मिन् पद्ये उक्तनिमित्ता विशेषोक्तिः ।

**विरोधाभासः**

वस्तुगत्या विरोधाभावेऽपि यत्र विरुद्धमिवाभिधानं स विरोधाभासः (अप्पयदीक्षितः, ७६) । नैषधीयचरिते यथा -

**अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।**
**चतुर्दशत्वं कृतवान्कृतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥** (१/४)

अत्र चतुर्दशसु विद्यासु अधीतिबोधारणप्रचारणै इत्युपाधिभेदैरपि कथं चतुर्दशविद्या ? इति विरोधः, चतस्रः दशा यासां ताश्चतुर्दशाः, तासां भावः चतुर्दशत्वम् इत्यर्थेन विरोधः परिहारो जायते, अतोऽत्र विरोधाभासालङ्कारः । यथा वा -

**प्रतिपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता ।**
**अमित्रजिन्मित्रजिदोजसा स यद् विचारदृक्चारदृगप्यवर्तत ॥** (१/१३)

अत्र 'अमित्रजित् मित्रजित्', 'विचारदृक् चारदृक्' इत्यत्र विरोधाभासः । अत्र योऽमित्रजित् स कथं मित्रजित् इति विरोधः । ओजसा अमित्रजित् =शत्रुजेता, तेजसा मित्रजित् = सूर्यजेता इति विरोधपरिहारः । एवञ्च यो विचारदृक् (चार दृग्भिन्नः) स कथं चारदृक् इति विरोधः । तत्परिहारस्तु विचारदृग् = विचारपूर्वकं द्रष्टा, चारदृक् = गुप्तचरनेत्र इति ।

विषमम्

कारणकार्ययोः गुणौ यदि विरुद्धौ भवेतां चेत् विषमालङ्कारो भवति, तथैव प्रारब्धस्य कार्यस्य वैफल्ये, अनिष्टस्योत्पत्तौ, विपरीतयोः पदार्थयोः संयोजने च विषमालङ्कार एव भवति (विश्वनाथः, १०/६९-७०) । नैषधीयचरिते यथा -

**कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।**
**वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटन्तपनिष्ठुराक्षरा ॥** (१/१३८)

मत्प्रियाशैत्यकोमलत्वनिर्मातुस्तव हस्तान्मद्भाले प्रियावियोजनसूचककठिनलिपिः कथं लिखितेति नलेन विधिं प्रति प्रतिपादिते कथने कारणेन विरुद्धस्य कार्यस्य वर्णनमस्ति, अतोऽत्र विषमालङ्कारः ।

**समम्**

आनुरूप्येण हेतुना योग्यस्य वस्तुनः प्रशंसा समम् (विश्वनाथः, १०/७८) ।

नैषधीयचरिते यथा -

**प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्ति कावपि ।**
**इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ॥** (१/३८)

अत्र नलस्य दमयन्त्याश्च द्वयोरपि रूपसाम्यवर्णनाद् समस्य समेन सह योगस्य वर्णनात् वा समालङ्कारः ।

**यथासङ्ख्यम्**

उद्दिष्टानां वस्तूनां क्रमेण पश्चात् स्थापनमेव यथासङ्ख्यम् । (विश्वनाथः, १०/७८) । नैषधीयचरिते यथा -

**कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती ।**

**तयोः प्रवालैर्वनयोस्तथाम्बुजै-र्नियोद्धुकामे किमु बद्धवर्मणी ॥** (१/१२३)

तयोर्वनयोः काननोदकयोर्वा यथाक्रमं प्रवालैस्तथाम्बुजैः सह समन्वयो विद्यते, अतोऽत्र यथासङ्ख्यम् ।

**अर्थापत्तिः**

दण्डापूपिकन्यायेन भिन्नार्थप्रतीतौ अर्थापत्तिरलङ्कारः । मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका (विश्वनाथः, १०/८३) । नैषधीयचरिते यथा -

**पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।**

**कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥** (१/३)

अत्र या स्मृतिमात्रेण शोधनी सा कीर्तनात् किमुतेति कैमुत्यन्यायेन शोधकत्वर्थेरर्थापत्तिरलङ्कारः ।

**समुच्चयः**

यत्रैकस्य कार्यस्य सिद्धये सत्यप्येकस्मिन् कारणे कारणान्तरणामपि खले कपोतिकन्यायेन समागमस्तत्र समुच्चयालङ्कारः (मम्मटः, १०/१०६) । नैषधीयचरिते यथा -

**ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि ! विपद्यते यदि ।**

**तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥** (१/१४०)

मयि मृते त्वयि जीवितायां च शिशूनां जीवनं कथमपि सम्भाव्यते, किन्तु त्वयि अपि मृतायां शिशवोऽपि नूनं मरिष्यन्तीति श्लोकार्थो विद्यते । अत्र स्वस्य दुःखरूपे कार्ये हंस्याः मृत्योः, शिशोश्च मृत्योः कल्पना कृता । एतानि कारणानि खले कपोतिकन्यायेन समागतानि सन्ति, अतोऽत्र समुच्चयालङ्कारः ।

**प्रतीपम्**

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्, निष्फलत्वाभिधानं वा प्रतीपम् । (विश्वनाथः, १०/८७) ।

नैषधीयचरिते यथा -

**तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।**

**तनोति भानोः परिवेषकैतवात् तदा विधिः कुण्डलनां विधोरपि ॥** (१/१४)

अत्र प्रसिद्धस्योपमानभूतस्य सूर्यस्य चन्द्रस्य च निष्फलताया अभिधानात् प्रतीपालङ्कारः ।

**स्वभावोक्तिः**

वस्तुनो जातिगुणक्रियानुरूपस्य स्वभावस्य वर्णनं स्वभावोक्तिः (अप्पयदीक्षितः, १६०) । नैषधीयचरिते यथा -

**अथावलम्ब्य क्षणमेकपादिकां तदा निदुावुपपल्वलं खगः ।**

**स तिर्यगावर्जितकंधरः शिरः पिधाय पक्षेण रतिक्लमालसः ॥** (१/१२१)

'सुरतखेदालसो हंसः तिर्यगावर्तितग्रीवः सन् पतत्रेण मूर्धानं पिधाय क्रीडासरोवरनिकटे क्षणं नदद्रौ' इत्यत्रालसयुतस्य हंसस्य यथार्थवर्णनात् स्वभावोक्तिरलङ्कारः ।

**व्याजोक्तिः**

उद्भिन्नस्यापि वस्तुनः व्याजाद् गोपनमेव व्याजोक्तिः (विश्वनाथः, १०/१२०) ।

नैषधीयचरिते यथा -

**मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजाम् ।**

**विलेपनस्याधिकचन्द्रभागता विभावनाच्चापललाप पाण्डुताम् ॥** (१/५१)

चन्दनमध्ये कर्पूरोऽधिको जातस्तेनाङ्गपाण्डुत्वम्, नत्वन्यत् कारणमिति कथयन् नलः मिथ्याखेदप्रकाशनात् दमयन्तीविरहोत्पन्नां निःश्वासपरम्परां जुगोप इति व्याजपूर्वकं गोपनविषयस्य प्रतिपादनादत्र व्याजोक्तिरलङ्कारः ।

**संसृष्टिः**

परस्परनिरपेक्षाणामलङ्काराणां तिलतण्डुलन्यायेन संस्थिति संसृष्टिरलङ्कारः । संसृष्ट्यलङ्कारे संयोगसम्बन्धेनालङ्कारयोरलङ्काराणां वा सम्मेलनं भवति (मम्मटः, १०/११७) । नैषधीयचरिते यथा -

**अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च ।**

**दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥** (१/१७)

'दिनेश्वरश्री' इत्यत्र दिनस्य ईश्वरः, तस्य इव श्रीर्यस्य इत्यत्रोपमालङ्कारः । एवञ्च 'कविना', 'बुधेन' इति द्वयोः पदयोः श्लेषालङ्कारः । अतः द्वयोरुपमाश्लेषालङ्कारयोः तिलतण्डुलन्यायेन परस्परनिरपेक्षरूपेणात्र संयोजनात् संसृष्टिरलङ्कारः ।

**सङ्करः**

अलङ्काराणाम् अङ्गाङ्गित्वेन एकाश्रयत्वेन संदिग्धत्वेन च स्थितौ सङ्करालङ्कारो भवति (विश्वनाथः, १०/९८) । नीरक्षीरन्यायेन सङ्करालङ्कारोऽवतिष्ठते । नैषधीयचरिते यथा -

**स्फुरद्धनुर्निःस्वनतद्धनाशुग प्रगल्भवृष्टिव्ययितस्य संगरे ।**

**निजस्य तेजः शिखिनः परश्शता वितेनुरङ्गारमिवायशः परे ॥** (१/९)

यथा गर्जन् मेघो धारासारेणाग्निमुपशमयति, तथैव नलोऽपि स्ववाणपरम्पराभिः शत्रूणां शौर्याभिमानं शमयतीति भावः । अत्र नले मेघत्वस्यारोपः, एवञ्च शत्रुषु अग्नित्वस्यारोपः परस्पराङ्गाङ्गिभावः, अतोऽत्र साङ्गरूपकम् । तथैव 'अङ्गारमिव' इत्यत्रोत्प्रेक्षालङ्कारः । अतः रूपक-उत्प्रेक्षालङ्कारयोरत्र नीरक्षीरन्यायेनाङ्गाङ्गिभावः सङ्करः ।

नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गे प्रयुक्तैरेतैरलङ्कारैर्महाकाव्यस्य भावपक्षं सौन्दर्यञ्च समेधितं दृश्यते । एतेषामलङ्काराणां माध्यमेन महाकाव्यस्य कथावस्त्वपि सजीवं प्रतीयते ।

**तालिकायां नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्था अलङ्काराः**

नैषधीयचरितमहाकाव्यस्य प्रथमसर्गे विद्यमाना अलङ्कारास्तालिकायामपि प्रदर्शयितुं शक्यन्ते, यथा -

| क.सं. | अलङ्काराः | श्लोकाः | क.सं. | अलङ्काराः | श्लोकाः |
|---|---|---|---|---|---|
| १. | पुनरुक्तवदाभासः | ४४ | १८. | परिकरः | १३५ |
| २. | अनुप्रासः | ३३ | १९. | परिकराङ्कुरः | २८ |
| ३. | लाटानुप्रासः | १३१ | २०. | पर्यायोक्तम् | ११ |
| ४. | यमकम् | १२९ | २१. | अर्थान्तरन्यासः | ५० |

| | | | | | |
|---|---|---|---|---|---|
| ५. | वक्रोक्तिः | ४ | २२. | काव्यलिङ्गम् | २४ |
| ६. | श्लेषः | १७ | २३. | विशेषोक्तिः | १०४ |
| ७. | उपमा | ६५,४९ | २४. | विरोधाभासः | ४,१३ |
| ८. | रूपकम् | ४२ | २५. | विषमम् | १३८ |
| ९. | ससन्देहः | १२२ | २६. | समम् | ३८ |
| १०. | भ्रान्तिमान् | ९५ | २७. | यथासङ्ख्यम् | १२३ |
| ११. | अपह्नुतिः | १४ | २८. | अर्थापत्तिः | ३ |
| १२. | उत्प्रेक्षा | ९,२२ | २९. | समुच्चयः | १४० |
| १३. | अतिशयोक्तिः | २० | ३०. | प्रतीपम् | १४ |
| १४. | तुल्ययोगिता | ४४ | ३१. | स्वभावोक्तिः | १२१ |
| १५. | निदर्शना | १६ | ३२. | व्याजोक्तिः | ५१ |
| १६. | व्यतिरेकः | १ | ३३. | संसृष्टिः | १७ |
| १७ | समासोक्तिः | ८५ | ३४. | सङ्करः | ९ |

तालिकायां प्रदर्शिता अलङ्कारा न केवलमेकस्मिन्नेव श्लोके विद्यन्ते, अपि तु एतेऽलङ्कारा विविधेषु श्लोकेषु प्राप्यन्ते । एकस्मिन्नेव श्लोकेऽपि विविधा अलङ्काराः संलक्ष्यन्ते । एतत्तु दिङ्मात्रप्रदर्शनमवगन्तव्यम् ।

**निष्कर्षः**

श्रीहर्षस्य नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गे षट्त्रिंशदधिकसङ्ख्यकानां प्रसिद्धानामलङ्काराणां प्रयोगोऽवलोक्यते । एतेषामलङ्काराणाम् औचित्यपूर्वकसंयोजनेन महाकाव्यमिदं श्रुतिमधुरमानन्दसन्दोह- प्रदायकञ्चानुभूयते । नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गे भामह-रुद्रट-दण्डि-मम्मट-विश्वनाथादिभिः पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानां नैकानामलङ्काराणां सान्दर्भिकं संयोजनं संलक्ष्यते । अत्र श्लोके श्लोकेऽनुप्रासालङ्कारस्य छटा विराजते । विषयवस्तूनां सन्दर्भानुसारेणात्रानुप्रासश्लेषयमक-उपमोत्प्रेक्षारूपकार्थान्तरन्यास-प्रभृतीनामलङ्काराणां प्रयोगो विलोक्यते । अत्र स्वाभाविकाः सान्दर्भिकाश्चालङ्काराः समापतिताः सन्ति । महाकाव्यस्य प्रथमे सर्गे रसभावगुणानुकूलानामलङ्काराणां संयोजनं दृश्यते । अत्रत्यानां शब्दार्थालङ्काराणां कुशलेन संयोजनेन महाकाव्यं सहृदयहृदयाह्लादकं प्रतीयते । अत्रापि प्रतिपदं भावगाम्भीर्यं पदमाधुर्यं भाषासौष्ठवं च विलोक्यते । अत्र प्रयुक्ता अलङ्कारा भाषानुकूलाः, चरित्रानुकूलाः, विषयानुकूलाश्च दृश्यन्ते । एतेऽलङ्काराः काव्यस्य सौन्दर्यपक्षं भावपक्षं च परिपोषयितुं सफलाः संलक्ष्यन्ते ।

**सन्दर्भसामग्रीसूची**

अप्पयदीक्षितः (ई. १९७६), कुवलयानन्दः, (व्याख्याकार : भोलाशङ्करव्यासः), चौखम्बाविद्या भवन ।

आचार्य जयदेव (ई.१९९९), चन्द्रालोकः, चौखम्बा सुरभारती प्रकाशन ।

आचार्य बलदेव उपाध्याय (ई.१९९२) संस्कृत साहित्य का इतिहास (दशम सं.), शारदा निकेतन ।

आचार्य रामचन्द्र मिश्रः (ई.२०१०) संस्कृतसाहित्येतिहासः, चौखम्बाविद्याभवन ।

आनन्दवर्धन (ई.२००६), ध्वन्यालोकः, चौखम्बा संस्कृत सिरिज अफिस ।

द्विवेदी, कपिलदेव, (ई.२०१५), प्रौढरचनानुवादकौमुदी (द्वाविंशतितमः सं.), विश्वविद्यालय प्रकाशन ।

द्विवेदी, कपिलदेव (ई.१९९२), संस्कृतनिबन्धशतकम् (पञ्चम सं.), विश्वविद्यालय प्रकाशन ।
मम्मटः (ई.१९९४), काव्यप्रकाशः (द्वि.सं.), (व्याख्या - वासुदेव शास्त्री अभ्यंकर), चौखम्बा विद्याभवन ।
राजवंश सहाय 'हीरा' (ई.१९७०), अलङ्कारानुशीलन, चौखम्बा विद्याभवन ।
राजवंश सहाय 'हीरा' (ई.२००२), संस्कृत साहित्य-कोश (च.सं.), चौखम्बा विद्याभवन ।
रुद्रटः (ई.१९८९)काव्यालङ्कारः, (व्याख्याता : रामदेव शुक्ल), चौखम्बा विद्याभवन ।
रुय्यकः (ई.२००१) अलङ्कारसर्वस्वम्, चौखम्बा सुरभारती प्रकाशन ।
वामनः (ई. २०१०), काव्यालङ्कारसूत्रवृत्तिः, (च.सं.), (व्या.-पं.केदारनाथ शर्मा), चौखम्बा कृष्णदास अकादमी ।
विश्वनाथः (ई.१९९५), साहित्यदर्पणः (पञ्चम सं.), कृष्णदास अकादमी ।
शुक्लः, रमेशचन्द्रः (वि.सं.२०२३), प्रबन्धरत्नाकरः, चौखम्बा विद्याभवन ।
श्रीहर्षः (ई.१९९१), नैषधीयचरितम्, (व्या.शेषराजशर्मा), चौखम्बा सुरभारती प्रकाशन ।
श्रीहर्षः (ई.१९८४) नैषधीयचरितम्, (व्या.क्षेमराज-श्रीकृष्णदास), खेमराज श्रीकृष्णदास ।
श्रीहर्षः (ई.१९५२), नैषधीयचरितम्, (व्या.नारायणराम आचार्य), लक्ष्मीबाई नारायण चौधरी ।
श्रीहर्षः (ई.१९७६), नैषधीयचरितम्, (व्या.मोहनदेव पन्त), मोतीलाल वनारसी दास ।